# INDIAN SCHOOL AL WADI AL KABIR

| Class: IX | Department: Sanskrit | Date of submission: NA |
| --- | --- | --- |
| Worksheet | Topic: अपठित गद्यांश - उत्तराणि | Note: Pl. file in portfolio |

**1. अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

एकदा एकः वैदेशिकः प्रथम-राष्ट्रपतेः श्रीराजेन्द्र प्रसादस्य गृहं प्राप्तवान् । राष्ट्रपतेः परिचारकः तं आतिथ्यगृहे प्रतीक्षितुम् अकथयत् तम् असूचयत् च यद् राष्ट्रपतिमहोदयः सम्प्रति पूजां करोति । स अतिथिः ज्ञातुम् ऐच्छत् यद् राष्ट्रपतिः कथं करोति पूजाम् ? सङ्कोचं कुर्वन् अपि स अन्तः पूजागृहं प्रविष्टः । राष्ट्रपतेः समक्षं विद्यमानं मृत्पिण्डं सोऽवन्दत श्रद्धया च तत्र उपाविशत् । पूजां परिसमाप्य राष्ट्रपतिमहोदयः पूजागृहे स्थितं तं दृष्ट्वा प्रसन्नः अभवत्, ससम्मानं तम् अन्तः अनयत् । आगन्तुकस्य ललाटे विद्यमानं भावं दृष्ट्वा श्रीराजेन्द्रप्रसादमहोदयः तस्य कौतूहलं विज्ञाय तस्मै सम्बोधयत् - एतद् मृत्पिण्डं भारतस्य भूम्याः प्रतीकम् अस्ति। एतेन मृत्पिण्डेन एव भारतीयाः महतीम् आध्यात्मिकां सम्पदं प्राप्नुवन्ति । अत एव वयं मृत्तिकायाः कणेषु ईश्वरस्य दर्शनमपि कुर्मः । अस्माकं विचारे तु मानवेषु, पशुपक्षिषु, पाषाणेषु, वृक्षादिषु किं वा अचेतनेषु अपि ईश्वरस्य सत्ता अस्ति ।

**I. एकपदेन उत्तरत-**

(i) कः श्रीराजेन्द्रप्रसादस्य गृहं प्राप्तवान्? वैदेशिकः

(ii) भारतभूम्याः प्रतीकम् किम् अस्ति? मृत्पिण्डम्

**II. पूर्णवाक्येन उत्तरत-**

(i) राष्ट्रपतिमहोदयः आगन्तुकं कुत्र दृष्ट्वा प्रसन्नः अभवत्?
उत्तर - राष्ट्रपतिमहोदयः आगन्तुकं पूजागृहे स्थितं तं दृष्ट्वा प्रसन्नः अभवत् ।

(ii) राजेन्द्रप्रसादमहोदयः आगन्तुकस्य कौतूहलं विज्ञाय तस्मै किं सम्बोधयत्?
उत्तर - श्रीराजेन्द्रप्रसादमहोदयः आगन्तुकस्य कौतूहलं विज्ञाय तस्मै सम्बोधयत् - एतद् मृत्पिण्डं भारतस्य भूम्याः प्रतीकम् अस्ति। अत एव वयं मृत्तिकायाः कणेषु ईश्वरस्य दर्शनमपि कुर्मः ।

**III. भाषिककार्यम् -**

(i) 'प्राप्नुवन्ति' अस्याः क्रियायाः कर्तृपदं किम्?

(क) महतीम् (ख) सम्पदम् (ग) मृत्पिण्डेन (घ) भारतीयाः

(ii) 'भावम्' इति विशेष्यस्य अत्र किं विशेषणम् वर्तते?

(क) विद्यमानम् (ख) ललाटे (ग) कौतूहलम् (घ) प्रतीकम्

(iii) 'चिह्नम्' अस्य कः पर्यायः अत्र प्रयुक्तः?

(क) प्रतीकम्          (ख) भावम्          (ग) मृत्पिण्डम्          (घ) पिण्डम्

****** OOO ******

2. **अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

भारते प्रतिषड्वर्षं प्रयागे कुम्भार्धकुम्भनामके महामेलके भवतः । एतयोः मेलकयोः सर्वस्मात् भारतात् जनाः अत्र आगच्छन्ति । तत्र महामेलके विभिन्नाः व्यवस्थाः यात्रिणां कृते क्रियन्ते। जनैः अपि ज्ञातव्यं यत् मेलकं गत्वा सुविधायाः अपेक्षा न करणीया। तत्र जनसम्मर्दनेन असुविधाः अपि सम्भवेयुः । जनः मेलामागत्य पूर्वं संगमे यथाकालं स्नानं कुर्यात्, ततः सत्यवसरे पटकुट्यां निवसेत् । मातरं पितरं भ्रातरमपि सहैव आनयेत् । सात्विकमाहारं खादेत् । मध्याह्ने मेलास्थितं हट्टम् गच्छेत्, आपणेभ्यः आवश्यकं कालोचितं वस्तु क्रीणीयात् । ततः सायं साधूनां, विदुषां महात्मनां चोपदेशान् शृणुयात्, नाट्यमण्डलीनां मधुरां रासलीलां पश्येत् मन्दिरं वा गच्छेत्। ततः जनः ग्रामे नगरे वा बन्धुभ्यः मित्रेभ्यः परिचितेभ्यः च वितरणार्थं प्रसादम् अवश्यमानयेत् । तस्यां मेलायां किमपि निषिद्धं कार्यं न करणीयम् यथा कोऽपि नद्यां वर्जितस्थाने न स्नातु, धूम्रपानादिकं न करोतु, अस्त्रादिकम् न निदधातु, आयुधं न रक्षतु, उच्चैः न वदतु, केनापि सह विवादं न करोतु । आवश्यके सति राजपुरुषाणां साहाय्यं सर्वः स्वीकरोतु ।

**1. एकपदेन उत्तरत-**

(i) जनः महामेलके कुम्भे कुत्र निवसेत्?          पटकुट्याम्

(ii) मेलायां जनः किं न निदधातु?          अस्त्रादिकम् न निदधातु

**II. पूर्णवाक्येन उत्तरत-**

(i) जनैः किं ज्ञातव्यम्? **उत्तर** - जनैः अपि ज्ञातव्यं यत् मेलकं गत्वा सुविधायाः अपेक्षा न करणीया।

(ii) (ii) जनः महामेलकात् किमर्थं प्रसादम् आनयेत्?

उत्तर - जनः ग्रामे नगरे वा बन्धुभ्यः मित्रेभ्यः परिचितेभ्यः च वितरणार्थं प्रसादम् अवश्यमानयेत् ।

**III. भाषिककार्यम्-**

**(i) अनुच्छेदे 'व्यवस्थाः' इति विशेष्यस्य विशेषणं किं लिखितम्?**

(क) सुविधायाः          (ख) महामेलके          (ग) विभिन्नाः          (घ) जनाः

**(ii) 'भोजनम्' इत्यस्य पदस्य कः पर्यायः अनुच्छेदे प्रयुक्तः?**

(क) आहारम्          (ख) सात्विकम्          (ग) मेलाम्          (घ) मेलकम्

**(iii) 'जनः' इति कर्तृपदस्य क्रियापदं किम्?**

(क) प्रसादम्          (ग) आनयेत्          (ख) ततः          (घ) अवश्यमानयेत्

IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत ।

उचितं शीर्षकम् - पावनं कुम्भ्मेलाकम्